# Shatpanchashika

# ષટ્પઞ્ચાશિકા

## Document Information

Text title : ShaTpanchashikA

File name : ShaTpanchAshikA.itx

Category : jyotisha, sociology_astrology

Location : doc_z_misc_sociology_astrology

Author : Prithuyashas

Transliterated by : Radu Canahai clradu at yahoo.com

Proofread by : Radu Canahai clradu at yahoo.com

Latest update : January 2, 2024

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

January 2, 2024

*sanskritdocuments.org*

# ષટ્પઞ્ચાશિકા

શ્રીવરાહમિહિરાત્મજપૃથુયશસા વિરચિતા

૧. અથ હોરાધ્યાય (7)
૨. ગમાગમાધ્યાયઃ (17)
૩. જયપરાજયોઽધ્યાયઃ (5)
૪. શુભાશુભલક્ષણાધ્યાયઃ (5)
૫. પ્રવાસચિન્તાધ્યાય (5)
૬. અથ નષ્ટપ્રાપ્ત્યાધ્યાય (6)
૭. અથ મિશ્રકાધ્યાય (11)

## અધ્યાય ૧

અથ હોરાધ્યાય

પ્રણિપત્ય રવિં મૂર્ધ્ના વરાહમિહિરાત્મજેન પૃથુયશસા ।
પ્રશ્ને કૃતાર્થગહના પરાર્થમુદ્દિશ્ય સધ્યશસા ॥ ૧॥

ચ્યુતિર્વિલગ્નાદ્ધિબુકાચ્ચ વૃદ્ધિર્મધ્યાત્પ્રવાસોઽસ્તમયાન્નિવૃત્તિઃ ।
વાચ્યઃ ગ્રહૈઃ પ્રશ્નવિલગ્નકાલાદૃહં પ્રવિષ્ટો હિબુકે પ્રવાસી ॥ ૨॥

યો યો ભાવઃ સ્વામિદૃષ્ટો યુતો વા સૌમ્યૈર્વા સ્યાત્તસ્ય તસ્યાસ્તિ વૃદ્ધિઃ ।
પાપૈરેવં તસ્ય ભાવસ્ય દાનિ નિર્દેષ્ટવ્યા પૃચ્છતાં જન્મતો વા ॥ ૩॥

સૌમ્યે વિલગ્ને યદિ વાસ્ય વર્ગે શીર્ષોદયે સિદ્ધિમુપૈતિ કાર્યમ્ ।
અતો વિપર્યસ્તમસિદ્ધિહેતુઃ કૃચ્છ્નેણ સંસિદ્ધિકરં વિમિશ્રમ્ ॥ ૪॥

હોરાસ્થિતઃ પૂર્ણ્યતનુઃ શશાઙ્કો જીવેન દૃષ્તો યદિ વા સિતેન ।
ધિપ્રં પ્રનષ્ટસ્ય કરોતિ લબ્ધિં લાભોપય તો બલવાઞ્છુભશ્ચ ॥ ૫॥

સ્વાંશે વિલગ્ને યદિ વા ત્રિકોણે સ્વાં શે સ્થિતઃ પશ્યતિ ધાતુચિન્તામ્ ।
પરાંશકસ્થશ્ચ કરોતિ જીવં મૂલં પરાંશોપગતઃ પરંશમ્ ॥ ૬॥

ધાતું મૂલં જીવં ત્રયો જરાશૌ યુગ્મે વિન્ધ્યાદેતદેવ પ્રતીપમ્ ।
લગ્ને યોંશસ્તત્ક્રમાક્ષગય એવ સન્ધેપોઽયં વિસ્તરાતત્પ્રભેદઃ ॥ ૭ ॥

ઇતિ શ્રીવરાહમિહિરાત્મજપૃથુયશોવિરચિતાયાં ષટ્પઞ્ચાશિકાયાં
હોરાધ્યાયઃ પ્રથમઃ સમ્પૂર્ણઃ ।

## અધ્યાય ૨

ગમાગમાધ્યાયઃ
વૃષસિંહવૃશ્ચિકઘટૈર્વિદ્ધિ સ્થાનં ગમાગમૌ ન સ્તઃ ।
ન નૃતં ચાપિ નષ્ટં ન રોગશાન્તિર્ન ચાભિભવઃ ॥ ૧॥

તદ્વિપરીતં તુ ચરૈર્દ્વિશરીરૈર્મિશ્રિતં ફલં ભવતિ ।
લગ્નેન્દ્વોર્વક્તવ્યં શુભદૃષ્ટ્યા શોભનમતોઽન્યત્ ॥ ૨॥

સુતશત્રુગતૈઃ પાપૈઃ શત્રુમાર્ગાન્નિવર્તતે ।
ચતુર્થગૈરપિ પ્રાપ્તઃ શત્રુર્ભગ્નો નિવર્તતે ॥ ૩॥

ભ્રષ્ટાલિકુન્ભકર્કટા રસાતલે યદા સ્થિતઃ ।
રિપોઃ પરાજયસ્તદાચતુષ્પદૈઃ પલાયનમ્ ॥ ૪॥

ચરોદયે શુભઃ સ્થિતઃ શુભં કરોતિ યાયિનામ્ ।
અશોભનૈરશોભનં સ્થિરોદયેઽપિ વા શુભમ્ ॥ ૫॥

સ્થિરે શશીચરોદયે ન ચાગમો રિપોર્યદા ।
તદાગમં રિપોર્વદ્વિપર્યયે વિપર્યયમ્ ॥ ૬॥

સ્થિરે તુ લગ્નમાગતે દ્વિરાત્મકે તુ ચન્દ્રમાઃ ।
નિવર્તતે રિપુસ્તદા સુદૂરમાગતોઽપિ સન્ ॥ ૭॥

ચરે શશી લગ્નગતો દ્વિદેહઃ પથોઽર્દ્ધમાગત્ય નિવર્તતે રિપુઃ ।
વિપ્રર્યતે ચાગમનં દ્વિધા સ્યાત્પરાજયઃ સ્યાદશુભેધિતે ॥ ૮॥

અર્કાર્કિઙ્સિતાનામેકોઽપિ ચરોદયે યદા ભવતિ ।
પ્રવવદેત્તદાશુગમનં વક્રગતૈર્નેતિ વક્તવ્યમ્ ॥ ૯॥

સ્થિરોદયે જીવશનૈશ્ચરેધિતે ગમાગમૌ નૈવ વદેત્ત પૃચ્છ્તઃ ।
ત્રિપઞ્ચષષ્ઠ રિપુસઙ્ગમાય પાપાશ્ચતુર્થા વિનિવર્તનાય ॥ ૧૦॥

નાગચ્છાતિ પરચક્રે યદાર્કચન્દ્રૌ ચતુર્થભવનસ્થૌ

બુધગુરુશુક્રા હિબુકે યદા શીઘ્રમાયાતિ ॥ ૧૧॥

મેષધનુઃ સિંહવવૃષા યત્યુદયસ્થા ભવન્તિ હિબુકે વા ।
શત્રુર્નિવર્તતિ તદા ગ્રહસહિતા વા વિયુક્તા વા ॥ ૧૨॥

સ્થિરરાશૌ યદ્યુદયે શનિગુરુર્વા સ્થિતસ્તદા શત્રુઃ ।
ઉદયે રવિર્ગુરુર્વા ચરરાશૌ સ્યાત્તદાગમનમ્ ॥ ૧૩॥

ગ્રહઃ સર્વોત્તમબલો લગ્નધસ્મિન્ ગૃહે સ્થિતઃ ।
માસૈસ્તત્તુલ્યસઙ્ખ્યાકૈર્નિવૃત્તિં યાતુરાદિશેત્ ॥ ૧૪॥

ચરાંશસ્થે ગ્રહે તસ્મિન્ કાલમેવા વિનિર્દિશેત્ ।
દ્વિગુણં સ્થિરભાગસ્થે ત્રિગુણં હ્યાત્મકાંશકે ॥ ૧૫॥

યાતુર્વિલગ્નાજ્જામિત્રભવનાધિપતિર્યદા ।
કરોતિ વક્રમાવૃતેઃ કાલાન્તં બ્રુવતે પરે ॥ ૧૬॥

ઉદયર્ક્ષચ્ચન્દ્રર્ક્ષં ભવતિ ચ યાવાદિનાનિ તાવદ્ભિઃ ।
આગમનં સ્યાચ્છન્નોર્યદિ મધ્યે ન ગ્રહઃ કશ્ચિત્ ॥ ૧૭॥

ઇતિ વરાહમિહિરાત્મજપૃથુયશોવિરચિતાયાં ષટ્પઞ્ચાશિકાયાં
ગમાગમાધ્યાયો દ્વિતીયઃ સમ્પૂર્ણઃ ।

## અધ્યાય ૩

જયપરાજયોઽધ્યાયઃ
દશમોદયસપ્તમગાઃ સૌમ્યા નગરાધિપસ્ય વિજયકરાઃ ।
આરાર્કિ ગ઼્યગુરુસિતાઃ પ્રભઙ્ગદૌ વિજયદા નવમે ॥ ૧॥

પૌરાસ્તૃતીયભવનાદ્ધર્મદ્વા યાયિનઃ શુભેઃ શુભદાઃ ।
વ્યયદશમાયે પાપાઃ પુરસ્ય નેષ્ટાઃ શુભા યાભા યાતુઃ ॥ ૨॥

નૃરાશિસંસ્થા હ્યુદયે શુભાઃ સ્યુર્વ્યયાયસંસ્થાશ્ચ યદા ભવન્તિ ।
તદાશુ સન્ધિં પ્રવદેન્નૃપાણાં પાપૈર્દ્વિદેહહોપગતૈર્વિરોધમ્ ॥ ૩॥

કેન્દ્રોપગતાઃ સૌમ્યાઃ સૌમ્યૈર્દૃષ્ટા નૃલગ્નગાઃ પ્રીતિમ્ ।
કુર્વાન્તિ પાપદૃષ્ટાઃ પાપાસ્તેષ્વેવ વિપરીતમ્ ॥ ૪॥

દ્વિતીયે વા તૃતીયે વા ગુરુશુક્રૌ યદા તદા ।
અશ્વેવાગચ્છતે સેના પ્રવાસો ચ ન સંશયઃ ॥ ૫॥

ઇતિ વરાહમિહિરાત્મજપૃથુયશોવિરચિતાયાં ષટ્પઞ્ચાશિકાયાં
જયપરાજયો નામ તૃતીયોઽધ્યાયઃ સમ્પૂર્ણઃ ।

## અધ્યાય ૪

શુભાશુભલક્ષણાધ્યાયઃ
કેન્દ્રત્રિકોણેષુ શુભસ્થિતેષુ પાપેષુ કેન્દ્રાષ્ટમવર્જિતેષુ ।
સર્વાર્થસિદ્ધિં પ્રવદેન્નરાણાં વિપર્યવસ્થેષુ વિપર્યયઃ સ્યાત્ ॥ ૧॥

ત્રિપઞ્ચલાભસ્તમયેષુ સૌમ્યા લાભપ્રદા નેષ્ટફલશ્ચ પાપાઃ ।
તુલાથ કન્યા મિથુનં ઘટશ્ચ નૃરાશયસ્તેષુ શુભં વદન્તિ ॥ ૨॥

સ્થાનપ્રદા દશમસપ્તમગાશ્ચ સૌમ્યા પાનાર્થદાઃ સ્વસુતલગ્નગતા ભવન્તિ ।
પાપા વ્યયાયસહિતાઃ સ્યુર્લગ્ને શશી ન શુભદો દશમે શુભશ્ચ ॥ ૩॥

ઇન્દું દ્વિસપ્તદશમાયરિપુત્રિસંસ્થ પશ્યેદ્ગુરુઃ શુભફલં પ્રમાદકૃતં સ્યાત્ ।
લગ્નત્રિધર્મસુતનૈર્ધનગાશ્ચ પાપાઃ કાર્યાર્થનાશભયદા શુભદ શુભશ્ચ ॥ ૪॥

શુભગ્રહાઃ સૌમ્યનિરોધિતાશ્ચ વિલગ્નસપ્તાષ્ટમઞ્ચમસ્થઃ ।
ત્રિષટ્દશાયે ચ નિશાકરઃ સ્યાચ્છુભં ભવેદ્રોગનિપીડિતાનામ્ ॥ ૫॥

ઇતિ વરાહમિહિરાત્મજપૃથુયશોવિરચિતાયાં ષટ્પઞ્ચાશિકાયાં
ચતુર્થોઽધ્યાયઃ સમ્પૂર્ણઃ ।

## અધ્યાય ૫

પ્રવાસચિન્તાધ્યાય
દુરગતસ્યાગમનં સુતધનસહજસ્થિતૈર્ગ્રહૈર્લગ્નાત્ ।
સૌમ્યૈર્નષ્ટપ્રાપ્તિં લબ્ધ્વાગમન ગુરુલિતાભ્યામ્ ॥ ૧॥

જામિત્રે ત્વથવા ષષ્ઠે ગ્રહઃ કેન્દ્રેઽથ વાક્પતિઃ ।
પ્રોષિતાગમનં વિદ્યાત્ ત્રિકોણે ગ઼્યે સિતેઽપિ વા ॥ ૨॥

અષ્ટમસ્થે નિશાનાથે કરાટકૈ પાયવર્જિતૈઃ ।
પ્રવાસી સુખમાયાતિ સૌમ્યૈર્લાભસમવિતઃ ॥ ૩॥

પૃષ્ઠોદયે પાપસ્તૃતીયે રિપુકેન્દ્રગે વા ।
સૌમ્યૈરદૃષ્ટા વધબન્ધદાઃ સ્યુર્નષ્ટા મુષિતાશ્ચ વાચ્યાઃ ॥ ૪॥

ગ્રહો વિલગ્નાદ્યતમે ગૃહે તુ તેનાહતા દ્વાદશ રાશયઃ સ્યુઃ ।
તાવદ્દિનાન્યાગમનસ્ય વિદ્યાનિવર્ત્તનં વક્રગતૈર્ગ્રહૈસ્તુ ॥ ૫॥

ઇતિ વરાહમિહિરાત્મજપૃથુયશોવિરચિતાયાં ષટ્પઞ્ચાશિકાયાં
પ્રવાસચિન્તાધ્યાયઃ પઞ્ચમઃ સમ્પૂર્ણઃ ।

## અધ્યાય ૬

અથ નષ્ટપ્રાપ્ત્યાધ્યાય
સ્થિરોદયે સ્થિરાંશે વા વર્ગોત્તમગતેઽપિ વા ।
સ્થિત તત્રૈવ તદ્દ્રવ્યં સ્વકિયેનૈવ ચોરિતમ્ ॥ ૧॥

આદિમધ્યાવસાનેષુ દ્રેક્કાણેષુ વિલગ્નતઃ ।
દ્વારદેશે તથા મધ્યે ગૃહન્તે ચ વદેદ્ધનમ્ ॥ ૨॥

પૂર્ણઃ શશી લગ્નગતઃ શુભો વા શીર્ષોદયે સૌમ્યનિરીધિતશ્ચ ।
તષ્ટસ્ય લાભ કુરુતે તદાશુ લાભોદયાતો બલવાઞ્છ્યભશ્ચ ॥ ૩॥

દિગ્વાચ્યા કેન્દ્રગતૈરસમ્ભવે વા વદેદ્વિલગ્નર્ધાત્ ।
મધ્યાચ્ચ્યુતૈર્વિલગ્નાન્નવાંશૈકર્યોજના વાચ્યા ॥ ૪॥

અંશકાજ્જ્ઞાયતે દ્રવ્યં દ્રેષ્કાણૈસ્તસ્કરાઃ સ્મૃતાઃ ।
રાશિભ્યઃ કાલદિગ્દેશા વયો જાતિશ્ચ લગ્નપાત્ ॥ ૫॥

ઇતિ વરાહમિહિરાત્મજપૃથુયશોવિરચિતાયાં ષટ્પઞ્ચાશિકાયાં
નષ્ટપ્રાપ્ત્યાધ્યાય ષષ્ઠઃ સમ્પૂર્ણઃ ।

## અધ્યાય ૭

અથ મિશ્રકાધ્યાય
વિષમસ્થિતેઽર્કપુત્રે સુતસ્ય જન્માન્યથાઽઙ્ગનાયશ્ચ ।
લભ્યા વરસ્ય નરી સમસ્થિતેઽતોઽન્યથા વામન્ ॥ ૧॥

ગુરુરાવિસૌમ્યૈર્દૃષ્ટસ્ત્રિસુતમદાયારિગઃ શશી લગ્નાત્ ।
ભવતિ ચ વિવાહકર્તા ત્રિકોણકેન્દ્રેષુ વા સૌમ્યાઃ ॥ ૨॥

ચન્દ્રાર્કયોઃ સપ્તમગૌ સિતાર્કી સુખેઽષ્ટમે વાપિ તથા વિલગ્નાત્ ।
દ્વિતીયદુશ્ચિક્યગતૌ તથા ચ વર્ષસુ વૃષ્ટિં પ્રવદેન્નરાણમ્ ॥ ૩॥

સૌમ્યા જલરાશિસ્થાસ્તૃતીયધનકેન્દ્રગાઃ સિતે પધે ।
ચન્દ્રે વાપ્યુદયગતે જલરાશિસ્થે વદેદ્વર્ષમ્ ॥ ૪॥

પુંવર્ગે લગ્નગતે પુંગ્રહદૃષ્ટે બલન્વિતે પુરુષઃ ।
યુગ્મે સ્ત્રીગ્રહદૃષ્ટે સ્ત્રીબુધયુક્તે તુ ગર્ભયુતા ॥ ૫॥

કુમારિકાં બાલશશી બુધશ્ચ વૃદ્ધાં શનીઃ સૂર્યગુરૂ પ્રસૂતામ્ ।
સ્ત્રીં કર્કશાં ભૌમસિતૌ વિધત્ત એવં વયઃ સ્યાત્પુરુષેષુ ચૈવમ્ ॥ ૬॥

આત્મસમંલગ્નગતૈર્ભ્રાતા સહજસ્થિતૈઃ સુતા સુતગૈઃ ।
માતા વા ભાગિની વા ચતુર્થગૈઃ શત્રુગૈ શત્રુઃ ॥ ૭॥

ભાર્યા સપ્તમસંસ્થૈર્નવમે ધર્માશ્રિતો ગુરુદશમે ।
સ્વાંશપતિમિત્રશત્રુષુ તથૈવ વાચ્યં બલયુતેષુ ॥ ૮॥

ચરલગ્ને ચરભાગે મધ્યાદ્ભ્રષ્ટે પ્રવાસાચિન્તા સ્યાત્ ।
ભ્રષ્ટઃ સપ્તમભવનાત્પુર્નનિવૃત્તો યદિ વ વક્રી ॥ ૯॥

અસ્તે રાવિસિતવક્રૈઃ પરજાયાં સ્વાં ગુરૌ બુધે વેશ્યામ્ ।
ચન્દ્રે ચ વયઃ શશિવત્પ્રવદેત્સૌરેઽશુભૈર્યુતદૃષ્ટઃ ॥ ૧૦॥

મન્દઃ પપસમેતો લગ્નન્નવમે અશુભૈર્યુતદૃષ્ટઃ ।
રોગાર્તઃ પરદેશે ચાષ્ટમગો મૃત્યુકર એવ ॥ ૧૧॥

સૌમ્યયુતોઽર્કઃ સૌમ્યૈઃ સન્દૃષ્ટશ્ચાષ્ટમર્ધસંસ્થશ્ચ
તસ્માદ્દેશાદન્યં ગતઃ સ વાચ્યઃ પિતા તસ્ય ॥ ૧૨॥

ઇતિ વરાહમિહિરાત્મજપૃથુયશોવિરચિતાયાં ષટ્પઞ્ચાશિકાયાં
મિશ્રકાધ્યાયઃ સપ્તમઃ સમ્પૂર્ણઃ ।

ઇતિ ષટ્પઞ્ચાશિકા સમાપ્તા ।

Encoded and proofread by Radu Canahai clradu at yahoo.com

*Shatpanchashika*

pdf was typeset on January 2, 2024

Please send corrections to *sanskrit@cheerful.com*